नतत्वज्ञानं न्मयो भवेत् यं मंतडक्रमाविंल स गुरुः प
रमो मतः यो वेत्ता सच्चिदानंदं हरेदिन्द्रियजं सुखम्
सेव्यास्ते गुरवः शिष्यैरमेममाः प्रतारकाः संसारभ
यभीतस्याभयदाता गुरुरादरात् व्रतोपवासनियमैर्तिर्यं
तास गुरुर्म्मतः यः प्रसन्नः क्षणार्द्धेन मोक्तारं तस्य प्रयच्छ
ति दुर्लभं तं विजानीयात् भवसागरतारकम् यः क्षणे
नात्मसामर्थ्यं स्वशिष्याय ददाति हि प्रियाया सादिर
हितः सगुरुर्द्देव दुर्लभः यः सद्यः प्रत्ययकरं सकलं भवा
त्मसौख्यदम् ज्ञानोपदेशं कुरुते स गुरुर्द्देव दुर्लभः
दीपाद्दीपान्तरं देवि संचरेत्तद्यथा तथा यो दद्यात् स
गुरुर्ज्ञानमभ्यासादिविवर्जितम् दर्शितस्य यथा तु
ष्टिराहाराद्ग्रहपतेर्यथा तथोपदेशमात्रेण ज्ञानदो दुर्ल
भो गुरुः गुरवो बहवः संति दीपवच्च गृहे गृहे दुर्लभोऽ
यं गुरुर्द्देवि सूर्य्यवत्सर्वदीपकः गुरवो बहवः संति
वेदशास्त्रादिपारगाः दुर्लभोऽयं गुरुर्द्देवि परतत्वार्थ।

ऊ पारगाः गुरवोबहवः संतियोगेनामतत्पराभुवि दुर्लभो
व ऽयंगुरुर्देविलोकेस्वात्मप्रकाशकः गुरवोबहवः सं
६५ तिसमंत्रौषधिवेदिनः निगमागमशास्त्रोक्तमंत्रज्ञोदु
र्लभोभुवि गुरवोबहवः संतिशिष्यवित्तापहारकाः
65 दुर्लभोऽयंगुरुर्देविशिष्यदुःखापहारकः वर्णाश्रम
कुलाचारनिरतागुरवोभुवि सर्वसंकल्पहीनोयःस
गुरुर्देविदुर्लभः गुरोर्यस्यैवसंस्पर्शात्परानन्दोऽभि
जायते गुरुंतमेववृणुयान्नापरंमतिमान्नरः यः
स्वात्मभवपर्य्यंतबुद्धिस्तस्यप्रवर्त्तते तस्यालोकनमा
त्रेणमुच्यतेनात्रसंशयः शंकयाभक्तितंसर्वंत्रैलोक्यं
सचराचरम् साशंकाभक्तितायेनसगुरुर्देविदुर्लभः
यथावह्निसमीपस्थंनवनीतंविलीयते तथापापं
विलीयेतसदाचार्य्यसमीपतः यथाप्रदीप्तानलःका
ष्ठशुष्कमात्रंचनिर्दहेत् तथागुरुकटाक्षस्तुशिष्यप
पदहेत्क्षणात् यथामहानिलोद्धूतंतूलंदशदिशो
व्रजेत् तथैवगुरुकारुण्यात्पापराशिःप्रलीयते
दीपदर्शनमात्रेणप्रणश्यतितमोयथा सद्गुरोर्दर्श
नाद्देवितथाज्ञानंप्रकाशते सर्वलक्षणसंपन्नोवे
दशास्त्रविधानवित् सर्वोपायविधानानितत्त्वज्ञानी
गुरुःस्मृतः पूजाहोमाश्रमाचारतपस्तीर्थव्रतादिकं

मंत्रागमादिविज्ञानं तत्वहीनस्य निष्फलम् सर्वमेवं यप
रे तत्वहीनात्मानं वेत्ति निश्चलः आत्मनोऽनुग्रहो नास्ति यः
स्यात्तु ग्रहः कुतः षट्प्रकारं मनोरूपं प्रत्यक्षं स्वतन्त्रस्थि
तम् यो न जानाति वामस्य कथं मोक्षं ददाम्यहं सबल
क्षणहीनोऽपि तत्वज्ञानी गुरुः स्मृतः तस्मात्तत्वविदेवे
ह मुक्तो मोचकएव च यस्तत्वविन्महेशानि स तत्त्वबो
धं यस्यापि तत्वहीनात्कुतो बोधः कुतोऽप्यात्मपरिग्र
हः तत्वेनैरुपदिष्टा ये तत्वज्ञास्तेन संशयः पशुभि
श्चोपदिष्टा ये देवि ते पशवः स्मृताः विद्धस्त्वेवं यथा देवि
नाविद्धो वेधको भवेत् मुक्तस्तु मोचयेद्बद्धं न मुक्तो मो
चकः कथम् अभिन्नश्चोद्धरेन्नावं न मूर्खो मूर्खमुद्धरेत्
शिलां संतारयेन्नौर्हि न शिला तारयेच्छिलाम् तत्वही
नेगुरौ लब्धा केवलं भवतत्परः इहामुत्र फलं किंचि
न्नाप्नोति नाप्नुयात्प्रिये शिवे गुरुत्रयं प्रोक्तं वैस्यैव गुरु
पंचकम् वेदशास्त्रेषु शानशो गुरुरेकः कुलप्रियः प्रे
रकः सूचकश्चैव वाचको दर्शकस्तथा शिक्षको बो
धकश्चैव षडेते गुरवः स्मृताः पंचैते कार्यभूताः स्युः
कारणं बोधको भवेत् पूर्णाभिषेककर्ता यो गुरुस्त
स्यैव पादुकाः पूजनीया महेशानि वकुलेऽपि न संशयः
श्रीगुरोर्लक्षणोपेतं संशयच्छेदकारकम् लब्ध्वा तं

कु नप्रदंदेविनगुर्वन्नरसमाश्रयेत् अनभिज्ञंगुरुंप्राप्यसं
व शयच्छेदकारकम् गुर्वन्तरंतुगत्वासौनैतद्दोषेणलि
९९ प्यते मधुलुब्धोयथाभृंगःपुष्पात्पुष्पांतरंव्रजेत्
66 इतितेकथितंकिंचिल्लक्षणंगुरुशिष्ययोः समासेन
कुलेशानिकिंभूयःश्रोतुमिच्छसि इतिकुलार्णवे
महारहस्येगुरुशिष्यलक्षणंनामत्रयोदशोल्लासः
।१३ श्रीदेव्युवाच कुलेशश्रोतुमिच्छामिपरीक्षांगु
रुशिष्ययोः उपदेशक्रमंदीक्षाभेदांश्चवदमेप्रभो श्री
ईश्वरउवाच शृणुदेविप्रवक्ष्यामियन्मांत्वंपरिपृच्छ
सि तस्यश्रवणमात्रेणचित्तशुद्धिःप्रजायते विनादी
क्षांफलंनस्यान्नियमिनांशिवशासने साचनस्याद्वि
नाचार्य्यमिसाचार्य्यपरःसरम् ज्ञेयासिद्धार्थशास्त्रा
र्थसंप्रदायार्हहेतुभिः अन्तरेणोपदेष्टारंमन्त्राःस्यु
र्निष्फलायतः देवास्तमेवशंसन्तिपारंपर्य्यपुरःस
रम् गुरुंमन्त्रागमाविष्टंसमयाचारपालकम् गुरु
शिष्याधिकारार्थंविरक्तोऽपिशिवाज्ञया किंचित्
कालंविधायेत्थंस्वशिष्यायसमर्पयेत् तस्यापिना
धिकारस्ययोगःसाक्षात्परेशिवे देहांतेशाश्वतीमु
क्तिरितिशंकरभाषितम् तस्मात्सर्वप्रयत्नेनसा
क्षात्परशिवोदितम् संप्रदायपरिच्छिन्नंसदाकु।

र्य्यान्तरं गुरुः प्रिये शक्तिसिद्धिमसिद्धार्थंपरीक्षाविधिव
द्गुरुः पश्चादुपदिशेन्मंत्रमन्यथा निष्फलं भवेत्
अमायेन तयोर्द्याद् गुरुणा सम्मायतस्तयः ददतो गुरु
तोदेविकुलशापोभविष्यति गुरुशिष्यावुभौमोहा
दपरीक्ष्यपरस्परम उपदेशं ददन्गृह्णन्प्राप्नुयातां
पिशाचताम अशास्त्रीयोपदेशं च यो गृह्णाति ददाति
हि भुंजते तावुभौ घोरे नरकानेकविंशतिः परीक्ष
वद्यनेतं त्वे सेकंत शालिवीजवत् अनर्हे मंत्रविज्ञा
नेन तिष्ठति कदाचन तस्मात्परीक्षकर्त्तव्यं अन्यथा
निष्फलं भवेत् कृत्वा समयदीक्षां च दत्वा समयपाड
काम् संविधायात्मनः शिष्यं वदेन्मंत्रं न चान्यथा सं
क्षिप्यायाति भक्ताय यज्ज्ञानमुपदिश्यते तज्ज्ञान
वरुशास्त्रार्थं तद्वि द्युत्यात्द्रव्यविक्रितम् असक्लिष्टभ
क्तेषु यज्ज्ञानमुपदिश्यते तत्प्रयामपवित्रं त्वंगोक्षी
रं श्वदृतादिव धनेच्छाभयलोभाद्यैरयोग्यं यदि दीक्ष
येत देवताशापमाप्नोति कृतं च निष्फलं भवेत् ज्ञा
नेन क्रियया वापि गुरुः शिष्यं परीक्षयेत् संवत्सरं त
दर्द्धं वा तदर्द्धं वा प्रयत्नतः उत्तमाश्चाधमेऽरुण्यां नीचा च
तमकर्माणि प्राणद्रव्यैःप्रदानाद्यैरादेशाः स समासमैः
नत्कर्म्मसूचके बाक्ये स्मायामिः कुरवेष्टितैः पत्त

कु पातेनमात्रेणैवगलेमेषग्रस्तगुरुर्गुरुः आकृष्टस्ताडितोवा
व पियोविषादं नयातिच गुरुः कृपां करोतीतिमुदास्मवित
९७ येतसदा श्रीगुरुस्मरणेचापिकीर्तनेदर्शनेऽपिच वन्द
नेपरिचर्य्यायांभाषणेप्रश्नणेप्रिये आनन्दकंपरोमां
चस्वरनेत्रादिविक्रिया येषांस्युस्तोत्रयोगाश्चदीक्षासं
स्कारकर्माणि शिष्योऽपिलक्षणैरेतैः कुर्य्याद्गुरु
परीक्षणम् आनन्दायैजपस्तोत्रध्यानहोमार्चनादिभिः
ज्ञानोपदेशसामर्थ्यं मन्त्रसिद्धिमयोश्वरि बोधकत्वपरि
ज्ञायशिष्योभूयात्त्वचात्मथा आदिमध्यावसानेषुयो
गणशक्तिनिपातितः अधमामध्यमाःश्रेष्ठाःशिष्यादेवि
प्रकीर्तिताः आदौभक्तिर्भवेद्देवि दीक्षार्थंमनुदंतिये पु
नर्विह्वलरूढांते आदियोगपारङ्गतैरिताः दीक्षासमयसं
प्राप्ताज्ञानाज्ञानविवर्जिताः भक्त्याप्रथमस्तत्प्रियोमध्य
योग्यास्तेस्मृताः आदौभक्तिविहीनायेमध्यभक्तास्त
येतराः अंतेभक्ताःप्रवृद्धाःस्युर्नतयोग्याभवंतिते उत्त
मज्ञानंसत्त्वाश्चउपदेशस्त्रियाप्रिये यथापिपीलिकामन्द
मन्दश्चत्वाग्रंफलं विरेणमोतिधर्मोपदेशस्यापितथा
स्मृतः यथाकपिश्चशाखायाःशाखाश्चलत्वायत्नतः फलं
प्राप्नोतिधर्मस्यचोपदेशस्तथाप्रिये यथाविषद्रुमःशी
घ्रंफलमवनिषीदति तथाज्ञानोपदेशाश्चकथितःकुल
नायिके

क्रियाया स्यादिरहिताद्देविदीक्षा त्रिधास्मृता यथा पद्मी
स्वपक्षाभ्यां शिशून् सम्वर्द्धयेत् शनैः स्पर्शदीक्षोपदेश
स्तादृशः कथितः प्रिये स्वापयमानि यथा मत्स्यो वी
क्षणेनैव पोषयेत् दृग्भ्यां दीक्षोपदेशस्तादृशः पर
मेश्वरि यथा कूर्म्मः स्वतनयान् ध्यानमात्रेण तोषयेत्
वेधदीक्षोपदेशस्य मात्रेषस्य तथाविधिः शक्तिमात्रा
नुसारेण शिष्योऽनुग्रहमर्हति यत्र शक्तिर्न्न पतति त
त्र सिद्धिर्न्न जायते दीक्षा मोक्षप्रदा देवि सम्यया परि
कीर्त्तिताः समयाख्या विशेषाख्य साधिकाख्य त्रिकाक्र
या क्रियाज्ञानकलास्पर्शज्ञानध्यानसमाकुलाः वे
यकाः पूर्णसंज्ञाः स्युश्चतुर्थ्या निर्वाणसंज्ञकाः क्रिया
दीक्षाष्टधा प्रोक्ता कुलमण्डपपूर्व्विका कलसादिस
मायुक्ता कर्त्तव्या गुरुणा वह्निः देवेशि देहसिद्धार्थं पू
र्व्वोक्तविधिनाचरेत् परमात्मनि संयोज्यते ह्यतं मगु
रुः प्रिये तस्मात्तत्पाद्यतान् वर्णान् न्यसेत् क्षिप्यतेनोगु
रुः सृष्टिक्रमेण विधिनाचेतसं च प्रयोजयेत् वर्णदी
क्षात्रिधा प्रोक्ता द्विचत्वारिंशद्वर्णैः पञ्चाशद्वर्णैर्व्वादे
वि द्विषष्टिलिपिस्तथा वर्णान् शिष्यतनौ न्यस्य प्रति
लोमेन संचरेत् जायते देवताभावः परानीतमयः शि
ष्यः एषा वर्णमयी प्रोक्ता दीक्षा पापहरा प्रिये कला

क्रि दीक्षा च विज्ञेया कर्तव्या विधिवत्प्रिये निवृत्तिर्जानुपा-
व र्य्यन्तं तलादारभ्य संस्थितः जानोश्च नाभिपर्य्यन्तं प्रति-
६८ ष्ठा तिष्ठति प्रिये नाभौ कण्ठावधि प्रोक्ता विद्या शान्तिस्ततः
68
प्रिये कण्ठाल्ललाटपर्य्यन्तं व्याप्ता तस्माच्छिरोवधि शान्त्य
तीता कला चैषा कलाव्याप्तिरितीरिता संहारक्रमयोगे
न स्थानात् स्थानान्तरं प्रिये संयोज्य विषये सम्यक् विधि
वेत्ता शिरोवधि इयं प्रोक्ता कुलेशानि दिव्यभावप्रदायिनी
चिन्तयेत् कलाभिर्व्याप्तं चाशङ्किरथापि वा तदभ्यास
क्रमेणैव सृष्टिसंहारमार्गतः ज्ञात्वा गुरुस्तु वो देवि शि-
ष्यं संयोज्य वेदयेत् जायते देवता भावो योगिनी वीरसंग-
मः कलादीक्षा समुद्दिष्टा पशुपाशापहारिणी हस्ते शि-
वं गुरुर्ध्यात्वा जपेन्मूलाङ्गमालिनीम् गुरुः स्पर्शेन तस्य शि-
ष्यस्य स्पर्शदीक्षा भवेदियम् चिन्तयेत्त्वं समाधाय परतत्त्वो
पबृंहितात् उच्चरेत्तं संहरतान् मन्त्री वाग्दीक्षेति निग-
द्यते निमीलनयने ध्यात्वा पतत्त्वं प्रसन्नधीः सम्यक्
पश्येद्गुरुः शिष्यं दृग्दीक्षा च भवेत् प्रिये गुरोरालो-
कमात्रेण भाषणात् स्पर्शनादपि सद्यः संजायते ज्ञानं
सा दीक्षा शाम्भवी मता मनोदीक्षा स्थिता प्रोक्ता तीव्रा
तीव्रतमापि च अध्वानं षड्विधं ज्ञात्वा शिष्यदेहे स्मर-
न् प्रिये कल्पयेद्भुवनं तत्त्वं कलावर्णपदं मनुम् ॥

आज्ञानुनाभिहृत्कण्ठतालमूलांतमंबिके गुरुपदि
ष्टमार्गेणवेधंकुर्य्याद्विचक्षणः पापक्षयःक्षणाच्छि
च्छाच्छिन्नपाशस्तथाभवेत् वायसश्चापरनिर्मुक्तो
भूमौपततितत्क्षणात् संजातदिव्यभावोऽसौस
र्वंजानातिशांभवि यदस्तिवेधकेतत्तत्स्वयमेवा
नुभूयते प्रबुद्धःसहसाशिष्यस्ततसौंव्यवरूपेश्वरि
वेधविद्धःशिवःसाक्षान्नपुनर्जन्मतांव्रजेत् यथाती
व्रतराडीक्षाभवबन्धविमोचनी शिवभावप्रदादे
वितांशपेकुलनायिके आनन्दश्चैवकंपश्चोद्भवोघू
र्णाकुलेश्वरि निद्रामूर्च्छाचवेधस्यषडवस्थाःप्रकी
र्त्तिताः दृश्यन्तेषडवस्थाह्येतेवेधनेनकुलेश्वरि वेध
कोयत्रकुत्रापितिष्ठन्मुक्तोनसंशयः वेधदीक्षाकरो
लोकेश्रीगुरुर्दुर्लभःप्रिये शिष्योऽपिदुर्लभस्तादृक्।
पुण्ययोगेनलभ्यते नदद्याद्वेधस्यकस्यापिरमात्ता।
परमेश्वरि कुलद्रव्यैःसमभ्यर्च्यकुलद्रव्यंविधानतः
शिष्यायदर्शयेद्विदीक्षैषाकौलिकीस्मृता शिवद
म्भेतुविशुद्ध्यंपंचगव्यामृतान्वितम् अभिषिंचेद्गु
रुःशिष्यंगात्रेषाव्यासमीरिता सबीजमीनयुक्तेन।
सरयाप्रतिनेनचपंचामृतैःसुसंपूर्णशांवेनकलशेन
वा अभिषेकंततःकुर्य्याद्दात्ततःकश्चितप्रिये मन

कु स्तलं विकारे देवी वक्त्रं कलसमुच्यते पंचगव्यामृतापूर्णं
व शिवं तेनाभिषिंचति अहं सिद्धाभिषेकः स्यादाचार्य्योः
६९ पिवर्णवेति त्रिकालं दंतकाष्ठचतुर्थाञ्जलिरपि प्रिये
शंखोदके कलामांसं तज्जलानं वा पृथाभवेत् समधी
दंतकाष्ठेन साधकः कुलमाञ्जलिः पुनः शंखोभिषे
केण बोधकं स्नजलेन च पूर्णाभिषेकेणाचार्य्यः पंचा
वस्थाः प्रकीर्त्तिताः कुलाचारेण निरता गुरुभक्ताः दृढ
व्रताः पूर्णाभिषेकपूताये तेषु कार्य्याः सर्वकर्म्मणि पूर्णा
भिषेकपूताये स्तावकुलनायिके पुनर्लब्धोत्तमज
न्मगुरुणा शिवरूपिणा शुद्धा पूर्णाभिषेकेण शिव
सायुज्यदायिना तेन मुक्तिं व्रजेद्देवि शांभवीवाचमब्रवी
त् पूर्णाभिषेकहीनो यः कौलिको म्रियते यदि पिशा
चत्वमवाप्नोति यावदाहूतसंप्लवम् दीक्षा च द्विविधा
प्रोक्ता बाह्याभ्यंतरभेदतः क्रियादीक्षा भवेद्बाह्या वे
धाख्याभ्यंतरी मता अतः शुद्धिर्बहिः शुद्धिर्द्विविधाप
रिकीर्त्तिता अन्तरा च क्रियाशुद्धिर्बहिः शुद्धिश्च दीक्षया
दीक्षया मोक्षदीपेन षडध्वालोऽपि विमुच्यते शरीरस्य न
संस्कारो न जातिर्न च कर्म्मणः आत्मनः कारयेद्दीक्षा
मनादिकुलकुण्डली दीक्षायाताकर्मसाम्याभिन्नाः स्युः
प्रतिपादिकाः अभिसम्भ्यानतो द्विविरशिकोत्तमशिष्ययोः

मंत्रौषधैर्यथा हन्याद्विषशक्तिं कुलेश्वरि पशुपाशं
तथा छिन्द्याद्दीक्षया मंत्रवित्क्षणात् अकस्मात्प
तितत्वे स्यात्परसंस्थानबोधनात् दीक्षैव मोक्षयेत
दूर्ध्वं दिशं यथा मनयत्नपि उपपातकलक्षाणि महापा
तककोटयः क्षणाद्दहति देवेशि दीक्षाविधिनाकृ
ता यथा चोन्मीलितात्मानो भवंति पशवः शिवाः सा
दीक्षा शुद्धिता देवि चण्डपापविशोधिका यथा दीक्षि
तमात्रेण जायते प्रसयाः प्रिये सा दीक्षा मोक्षदात्रे या
शेषाक्लजनसेविका: उपासनाशतेनापि या चिंता
नैव पश्यति तां दीक्षां मामाश्रये द्यत्नात् श्रीगुरोर्मंत्र
सिद्धये रसेन्द्रेण यथा विद्धमयः स्वर्णतां व्रजेत् दी
क्षान्वितस्तथा ह्यात्मा शिवत्वं लभते प्रिये दीक्षाग्नि द
ग्धकर्मासौ माया विच्छिन्नबन्धनः गतोऽपि शूद्रस्य शूद्र
त्वं विप्रस्यापि च विप्रता दीक्षासंस्कारसंपन्ने जाति भे
दो न विद्यते शिवलिंगे शिलाबुद्धिं कुर्वन्यत्पापम:
श्नुते देवैः श्मलोहसद्रत्नजातिलिंगप्रतिष्ठितम् यथा
व्यते तथा शूद्रा सर्ववर्णास्तु दीक्षिताः येन पूजित·
मात्रेण चान्नमभुवनांतिकम् पूजितं तेन सर्वस्यादी·
क्षितेन न संशयः दीक्षितस्य न कार्यस्यात्तपोभिर्निय
मव्रतैः न तीर्थदेवगमानेन न च शारीरयंत्रणैः अदी

कु क्षितायेकुर्वीतिजपपूजादिकाःक्रियाः नफलंतिप्रियेते
व षांशिलायामुप्तबीजवत् देविदीक्षाविहीनस्य नसिद्धि
७ नैवसद्गतिः तस्मात्सर्वप्रयत्नेनगुरुणादीक्षितोभ
70 वेत् द्विजोयोदीक्षितःपश्चात्दंतजःपूर्वदीक्षितः द्विजः
कनिष्ठःसज्येष्ठइतिशास्त्रस्यनिर्णयः गुरुशक्तिसुता
नांचयोभवेत्पूर्वदीक्षितः गुरवस्तेनतेपूज्यानावमा
न्याःकथंचन शिष्योदीक्षितमात्रश्चेद्यदिस्वर्गगतोगु
रुः एकसंतानकेनैवपूर्णसंख्यांसमाचरेत् दर्शनेषु
सर्वेषुगुरुणाज्ञानशालिना दीक्षितोयस्तुविधिना
सउक्तोनापरःप्रिये अधिवासश्चपूर्वंतुचक्रपूजापुरःस
रम् दीक्षयाशोधयेच्छिष्यमन्यथानिष्फलंभवेत् शुद्ध
शंकरजातीनामादीक्षाप्रविधीयते पादुकादिप्रदाना
द्यैःकुर्य्यात्पाशविमोचनम् एकाहेनद्विजोयोग्यःत
त्रिघावन्मरहयात् वैश्योयोग्यस्त्रिभिर्वर्षैश्चतुर्भिःशू
द्रएवच विधवायाःसुतादेशात्कन्यायाःपितुराज्ञया
नाधिकारीसुतोनार्य्योभार्य्यायाभर्तुराज्ञया स्नाहेदाध्य
यनेशूद्रोनाधिकारीयथाभवेत् तथैवादीक्षितस्यापिना
धिकारीकुलेश्वरि श्रीगुरुंगुरुपत्नींचततपुत्रंशक्ति
सैनिकान् दीक्षितान्तोषयेद्वियथाविभवविस्तरम्
इतितेकथितंकिंचित्परीक्षागुरुशिष्ययोः दीक्षाभे

दादिकंदेविकिंभूयःश्रोतुमिच्छसि इतिश्रीकुलार्ण
वेमहारहस्येचतुर्दशोल्लासः १४ श्रीदेव्युवाच कुले॰
शश्रोतुमिच्छामिपुरश्चरणलक्षणम् स्नानाहारादिनि
यंवदमेपरमेश्वर श्रीईश्वरउवाच शृणुदेविप्रवक्ष्या
मियन्मांत्वंपरिपृच्छसि तस्यश्रवणमात्रेणमंत्रस्तत्प्र
काशते जपयज्ञात्परोयज्ञोनापरोऽस्तीहकश्चन तस्मा
ज्जपेनधर्मार्थकाममोक्षांश्चसाधयेत् सर्वधर्मान्परि
त्यज्यमंत्रराजंसमभ्यसेत् अप्रमादात्भवेत्सिद्धिः
प्रमादाद्दुःखंभवेत् भोगापवर्गसंकल्पैःकल्पवृक्षसम
स्तेजपः जपध्यानसमंयोगंतस्माद्देविसमाचरेत् श्रा
द्धबीजदोषाश्चनियमातिक्रमोद्भवम् ज्ञानाज्ञानकृ
तंसर्वंप्रणश्यतिजपात्प्रिये संसारदुःखभूमेश्चयदी
च्छेत्सिद्धिमात्मनः पंचांगोपासनेनैवमंत्रजापीव्रजे
त्सदावम् पूजात्रैकालिकीनित्यंजपस्तर्पणमेवच
होमोब्राह्मणभुक्तिश्चपुरश्चरणमुच्यते यद्यदंगंवि
हीयेततत्संख्याद्विगुणोजपः कुर्यात्हित्रिचतुःपंच
संख्यांनसाधकःप्रिये कुर्वीतेचांगसिद्ध्यर्थंतदशांशे
नभक्तितः नचेदंगंविहीयेतमंत्रीनष्टमवाप्नुयात् श्र
द्धेश्वरविधेयेर्देविपदार्थैःऋतुसान्वितैः सभोजितेषुवि
प्रेषुसर्वंहिसफलंभवेत् सम्यकसिद्धेकमंत्रस्यपंचा

कु गोपासनेनच सर्व्वमंत्राश्च सिध्यंति तत्प्रसादात् कुले
व श्वरि उपदेशस्य सामर्थ्यात् श्रीगुरोश्च प्रसादतः मंत्र
७८ प्रभाववशाच्चापि मंत्रसिद्धिः प्रजायते स्वमंत्राक्षरसंयु
क्तमातृकाक्षरमंबिके पूर्व्वजन्मकृताभ्यासान्मंत्रो वा
शीघ्रसिद्धिदः दीक्षापूर्व्वकुलेशानि पारंपर्यक्रमागते
माघलब्धस्य योमंत्रः सचसिद्धो न संशयः मासमात्रं जपे
न्मंत्रं भूतलिप्यात्तसंपुटम् क्रमात्क्रमात्सहस्रं तत
स्य सिद्धो भवेन्मनुः सहस्रं प्रजपेन्मंत्रं मातृकाक्षर
संपुटम् अनुलोमविलोमेन मंत्रसिद्धिः प्रजायते त्रि
षष्ट्यक्षरसंयुक्तमातृकाक्षरसंपुटम् क्रमोत्क्रमात्
शतं जप्त्वा मासात् सिद्धो भवेन्मनुः मातृकाजपमात्रे
ण मंत्राणां कोटिकोटयः जपिताः स्युर्न सन्देहो यद्य
त्संख्यं तदुद्भवम् अनेन कोटिमंत्राणि विनाकुलकरा
णिच मंत्रगुरुजपात्मासमेकं स्यात् सर्व्वसिद्धिदम् य
दृच्छया श्रुतं मंत्रं दृष्टेणापि छलेन च पत्रेस्थितं वाचा
प्याप्य तज्जपेत्स्यानर्थकृत पुस्तके लिखितान्मंत्रान्
विलोक्य प्रजपंति ये ब्रह्महत्यासमं तेषां पातकं परि
कीर्तितं पुण्यक्षेत्रे नदीतीरे गुहापर्व्वतमस्तके तीर्थप्रदेशाः
सिन्धूनां संगमः पावनं वनं उद्यानानि विविक्तानि बिल्वमू
लं तटं गिरेः देवतायतनं कूलं समुद्रस्य निजं गृहम्

साधनेषुप्रशस्तानिस्थानान्येतानिमंत्रिणाम् अथवा
निवसेत्तत्रयत्रचित्तंप्रसीदति सूर्यस्याग्नेर्गुरोरिंदोर्दी
पस्यसलिलस्यच गोरत्नकुलवृद्धाणांसन्निधौशस्य
तेजपः गृहेशतगुणंविद्याद्गोष्ठेलक्षगुणंभवेत् को
टिर्देवालयेपुण्यमनंतंशिवसन्निधौ सच्छडदृमग
व्यालशंकातंकविवर्जितः एकांतपावनेनिर्द्वाररहिते
भक्तिसंयुते स्वदेशेधार्मिकेदेशेसुभिक्षेनिरुपद्रवे
रम्येभक्तजनस्थानेनिवसेत्तापसाश्रये राजानःसचि
वाराज्ञःप्रभवाःपुरुषाजनाः वर्तंतियेनमार्गेणनिवसे
त्तत्रमंत्रवित् जीर्णदेवालयोद्यानेवृक्षरुद्ततलेषुच
नदीतडागकूपेषुभूविवरादिषुनोविशेत् दीपनार्थम
विज्ञाययोजपादिकमाचरेत् वंशाश्मधरणीदारुतृ
णवल्लवनिर्मितम् वर्जयेदासनंधीमान्दारिद्र्यव्या
धिदुःखदम् तूलकंबलवस्त्राणांसिंहव्याघ्रमृगाजि
नम् कल्पयेदासनंधीमान्सौभाग्यज्ञानवृद्धिदं पद्म
स्वस्तिकवीरादिष्वासनेषुपविश्यच जपार्चनादिकंकु
र्यादन्यथानिष्फलंभवेत् द्वादशावर्तयेदुद्याप्रणव
त्त्रिमात्रकम् मुंचेत्पिंगलयावायुमंतस्थंरेचकोभ
वेत् षोडशावर्तकंतावत्पूरयेद्वायुमारुतम् शनैकैरि
ड्यावद्वापूरकंपरिकीर्तितम् द्वादशावर्तकंतारंवायु

कु वीजेन देहशोषणमीरितम् पुनश्च पूरयेद्वायुं विरेच्या
व पूर्य्य कुंभयेत् देहदहनवीजेन देहदाहनमीरितम् पु
७२ नश्च पृथ्वीवद्वायुं विरेच्यापूर्य्य कुंभयेत् शिवकुण्डलि
नीयोगस्यन्दनामृतधारया आपादमस्तकं देवि प्लाव
येत् प्लावनं भवेत् जपो ध्यानं विना गर्भः सगर्भस्तद्वि
पर्य्ययः अगर्भगर्भसंयुक्तः प्राणायामः शताधिकः
तपांसि तीर्थयात्रा यमस्थदानव्रतादयः प्राणायामस्य
तस्यैते कलां नार्हन्ति षोडशीम् मानसं वाचिकं पापं
कायिकं वापि यत्कृतं तत्सर्व्वं निर्द्दहेत्क्षिप्रं प्राणा-
यामत्रयेणैव दह्यन्ते ध्मायमानानां धातूनां च यथा मलं
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य संयमः प्राणायामे-
ष्वशुद्धात्मा यद्यत्कर्म्म करोति हि न तत्फलमम
न्देहस्य प्रयत्नेन वाहृतम् आगमोक्तेन मार्गेण सासं-
निसं करोति यः देवताभावमाप्नोति मंत्रसिद्धिः प्रजायते
योऽसौ मम कवचच्छन्दो मंत्रं जपति च प्रिये विज्ञाद्दृष्टोप
लायंते स्मिंदेहे दृष्ट्वा यथा गजाः अकृत्वा मासजालं यो मू
ढत्वात् प्रजपेन्मनुम् वाध्यते सर्व्वविघ्नैश्च सिंहैर्मृगप-
शुर्यथा अक्षमालाद्विधा प्रोक्ता कल्पिता कल्पितेति च
कल्पितामालाभिःस्फुमामातृकास्यादकल्पिता आदि
दांतान्तरांतत्वादक्षमालेति कीर्त्तिता अनुलोमविलो

सांख्यांगणयेन्मंत्रवित्तमः एकैकमंगुलीभिः स्यादंगुला
भिर्दशधाफलम् मालाभिः शतसाहस्रं मालिम्यानंतं
मुच्यते त्रिंशद्भिः स्याद्धनपुष्टिः सप्तविंशतिभिर्भवेत् पं
चविंशतिर्मोक्षं पंचदशाभिचारके पंचाशद्भिः कले
शानि सर्वसिद्धिरितीरिता अंगुष्ठेन च मोक्षं स्यात्तर्जनी
शत्रुनाशिनी मध्यमाय नदा विद्यात् शांतिकर्म्मणि अ
नामिका कनिष्ठा स्तंभनाकर्षणे चांगुलीषु प्रकीर्त्तिता
एतावद्वजपिष्यामि यादो संकल्प्यं मंत्रवित् स्थिरास
नो जपित्वा वै देव्यै सोदकमर्पयेत् उच्चैर्जपोऽधमः प्रो
क्त उपांशुर्मध्यमः स्मृतः उत्तमो मानसो देवि त्रिविधः
कथितो जपः अतिह्रस्वो व्याधिहेतुरतिदीर्घं तपःक्षयः
अक्षराक्षरसंयुक्तं जपेन्मौक्तिकपंक्तिवत् मनसा यः
स्मरेत्स्तोत्रं वचसा वा मनुं जपेत् उभयं निष्फलं देवि
भिन्नभाण्डोदकं यथा जातसूतकमादौ स्यादंते मृत
सूतकम् सूतकद्वयसंयुक्तो यो मंत्रः स न सिध्यति अ
न्तस्त्विहितं कृत्वा मंत्रमावर्त्तयेत्सदा सूतकद्वयसं
युक्तो यो मंत्रः स हि सिध्यति मंत्रार्थं मंत्रचैतन्यं योनिमु
द्रां न वेत्ति यः शतकोटिजपेनापि तस्य सिद्धिर्न जायते गु
रवीर्य्याश्रये मंत्रा नदास्यंति फलं प्रिये मंत्राश्चैतन्यस
हिताः सर्वसिद्धिकराः स्मृताः चैतन्यरहिता मंत्राः प्रोक्ताव

कु णास्तु केवलम् फलं नैव प्रयच्छंति लक्षकोटिजपादपि
व मंत्रोच्चारे कृते यादृक् स्वरूपं प्रथमं भवेत् शते सहस्रे ल
७३ क्षे वा कोटिजापेन तत्फलम् हृद्ग्रंथिभेदश्च सर्वा
वयववर्द्धनम् आनन्दाश्रुश्च पुलको देहावेशः कुलेश्व
रि गद्गदोक्तिश्च सहसा जायते नात्र संशयः सकृदुच्च
रितेऽप्येवं मंत्रे चैतन्यसंयुते दृश्यंते प्रत्यया यत्र पारंप
र्यं तदुच्यते वरुकूटाक्षरो भग्नो बद्धः कृत्स्नभेदितः
बालकुमारो युवको वृद्धः प्रौढस्त्वगर्वितः स्तंभितो मू
र्छितः कष्टः सेवितः खंडितः प्रिये मंत्रः पराङ्मुखश्छि
न्नो बधिरोऽन्धश्चाचेतनः केकरः शोषितः कूमः स्थानदु
ष्टश्च पीडितः निःस्नेहो विकलः स्तब्धो निर्जीवः खंडि
तारिको ह्रस्वमत्तिरस्कृतो लीढो मलिनश्च दुरासदः
निःसत्वो निर्दयो दग्धश्च पलश्च भयंकरः निस्त्रिंशो वि
कृता वामः फलहीनो निकृंतनः निर्वीजो भ्रमितः शामो
रुत्तः कृष्णो ह्रः हीनतः जडोऽरिप्रुरुदासीनो लज्जितो माहि
तः प्रिये संमेतान् मंत्रदोषांश्च ज्ञात्वा पश्चाज्जपेन्मंत्रं
सिद्धिर्न जायते तस्य लक्षकोटिजपादपि कथ्यंते दश
संस्कारा मंत्रदोषहरा प्रिये जननं जीवनं पश्चात्ताडनं
बोधनं ततः अभिषेकोऽथ विमलीकरणाप्यायने त
था तर्पणं दीपनं गुप्तिः संस्काराः कुलनायिके ॐ

शाणोल्लीढानि शस्त्राणि यथास्युर्निशितानि वै मंत्राश्च
स्तु तीक्ष्णतां यांति संस्कारैर्दशभिस्तथा भक्त्येह विष्णुशाका
दि विहितानि फलान्यपि मूलशाकं यथा वानाचशस्तान्येता
नि मंत्रिणाम् यस्यान्नपानमश्नाति कुरुते धर्मसंचयं
अन्नदातुः फलं चार्द्धं कर्तुश्चार्द्धं न संशयः तस्मात्सर्व
प्रयत्नेन परान्नं वर्जयेत्सुधीः पुरश्चरणकाले च काम्य
कर्मस्वपीश्वरि जिह्वा दग्धा परान्नेन करौ दग्धौ प्रति
ग्रहात् मनो दग्धं परस्त्रीभिः कार्यसिद्धिः कथं भवेत् रु
न्द्वग्निरुद्रग्रहद्युक्वेदार्कदिक्षट्छस्त षोडशमनुवा
णाब्धितिथित्रयोदशस्वपि लिखेत्षोडशकोष्टेषु मा
तृकार्णान् विचक्षणः स्वनामाद्यक्षराद्यावन्मंत्राद्या
क्षरदर्शनम् सिद्धादीन्कल्पयेन्मंत्री कुर्यात्सिद्धादि
भिः पुनः सिद्धसिद्धो जपात्सिद्धो द्विगुणात्सिद्धसाध्य
कः सिद्धसुसिद्धोऽर्द्धजपात्सिद्धारिर्हंति बान्धवान्
साध्यसिद्धोऽतिसंक्लेशात्साध्यसाध्यो निरर्थकः सा
ध्यसुसिद्धो भजनात्साध्यारिर्हंति गोत्रजान् सुसिद्धसि
द्धोऽर्द्धजपात्तत्साध्यस्तु यथाकृतः ततसुसिद्धो ग्रहादे
व सुसिद्धारिः स्वगोत्रहा अरिसिद्धः सुतं हन्यादरिसाध्यस्तु
योषिताम् ततसुसिद्धः कुलं हंति स्वात्मानं हंति तद्विपुः
सिद्धार्णबान्धवाः प्रोक्ताः साध्यास्ते सेवकाः स्मृताः सुसि

कु द्धाःपोषकाज्ञेयाःशत्रवोघातकाःस्मृताः वान्धवानव
व वर्णैकस्मिन्द्विषड्दशसेवकाः प्रापलेपपट्प्रापरुद्रस्थाः
१४ निवर्कनरः लोकलोकपट्प्रापघनघातेषु भेदिताः वर्ण
क्रमात्पूर्वोसेतरेवंसंप्रगतेतयोः जन्मसंपद्विपत्क्षे
मप्रत्यरिःसाधकोवधः मित्रंपरममित्रंचजन्मादीनि
पुनःपुनः वर्णंगौरत्वंशोणंसमीनोभेत्तिराशिषु क्र
मेणभेदितावर्णाःकन्यायांशादयःस्मृताः लग्नंधनं
भ्रातृबन्धुपुत्रशत्रुकलत्रकाः मरणंधर्मकर्माय
व्यया द्वादशराशयः नामाद्यक्षरमारभ्ययावन्मंत्रादि
माक्षरम् त्रिधाकृत्वास्वैर्भिन्द्यात्तदन्यद्विपरीतकम्
कृत्वाधिकमृणंज्ञेयमृणीचेन्मंत्रवित्तमः स्वयमृणीचे
न्मंत्रंजपेत्पूर्वमृणीयतः वाय्वग्निभूजलाकाशाः
पंचाशल्लिपयःस्थिताः महीसलिलयोर्मित्रमनिला
नलयोरपि शात्रवंवैपरीत्येनमंत्रस्तद्वैरंचापरम् प
रस्परविरुद्धानांवर्णानांयत्रसंगतिः वर्जयेत्तादृशंमंत्रंता
नुक्तंतत्कुलेश्वरि एकाक्षरेतथाकूटेत्रैपुरेमंत्रनायके
श्रीदत्तेसमलब्धेचसिद्धादीन्नैवशोधयेत् मंत्रसिद्धोप
दिष्टेषुचतुराम्नायजेषुच मालामंत्रेषुदेवेशिसिद्धादी
न्नैवशोधयेत् नृसिंहार्कवराहाणांप्रासादप्रणवस्य
च सपिण्डाक्षरमंत्राणांसिद्धादीन्नैवशोधयेत् ॐ ग

मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः न सिध्यति
वरारोहे कल्पकोटिजपादपि वादार्थं पठ्यते विद्यापरा
र्थं क्रियते जपः ख्यात्यर्थं दीयते दानं कथं सिद्धिर्वरान
ने धनार्थं गम्यते तीर्थं दंभार्थं क्रियते तपः अमेध्येन तु
देहेन न्यासं देवार्च्चनं जपः होमं कुर्वंति ये मूढास्तत्स
र्वं निष्फलं भवेत् विण्मूत्रमागशोषादिशुक्रः कर्म्म क
रोति यः जपार्चनादिकं सर्वं अपवित्रं भवेत्प्रिये मलि
नांबरकेशादिमुखदौर्गन्ध्यसंयुतः यो जपेत्तं दहत्याशु
देवता स्वयमर्पितम् आलस्यं जृंभणं निद्रां क्षुतं निष्ठी
वनं भयम् नीचांगस्पर्शनं कोपं जपकाले विवर्जयेत्
अत्याहारः प्रलापश्च प्रजल्पो नियमाग्रहः अत्यासंगश्च
लौल्यं च षड्भिर्मंत्रो न सिध्यति उष्णीषी कंचुकी नग्नो
मुक्तकेशो गणावृतः अपवित्रो नरो यस्तु निगच्छन्
जपेत्प्रिये नाऽसुः खिन्नच्छेदं विवादं वा मनोरथम्
वहिः स्वदेहवासं च जपकाले विवर्जयेत् शांतः शुचि
र्मिताहारो भूपाद्यो भक्तिमान् वशी निर्द्वंद्वः स्थिर
धीर्मौनी संयतात्मा जपेत्प्रिये विश्वासास्तिक्यकरु
णाश्रद्धानिष्ठमनिश्चयैः संतोषात्स्वकायक्लेशादिगु
णोधिको जपेन्नरः स्रगन्धिपुष्पाभरणवस्त्रादिभिरलं
कृतः तस्य हस्तगता सिद्धिर्नामस्मजपकोटितः तन्ति

कु सुखासनगतप्राणांस्तत्त्वविन्नलत्त्वपरायणः तत्पदार्थानुस
व न्धानेकुर्वन्मंत्रं जपेत्प्रिये जपात्श्रान्तः पुनर्ध्यायेत्
७५ ध्यानात्श्रान्तः पुनर्जपेत् इति ते कथितं किंचित्पुरश्च
रणलक्षणम् समासेन कुलेशानि किंभूयः श्रोतुमि
च्छसि इति श्रीकुलार्णवे महारहस्ये सपादलक्षग्रन्थे पु
रश्चरणकथनं नाम पंचदशोल्लासः १५ श्रीदेव्युवाच
कुलेश श्रोतुमिच्छामि करुणामृतवारिधे काम्यक
र्मविधानं च वद मे परमेश्वर श्रीईश्वर उवाच शृणु
देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि तस्य श्रवणमा
त्रेण प्रयोगनिपुणो भवेत् मंत्री विशुद्धहृदयः पूर्वोक्त
विधयान्वितः श्रीप्रासादपरामंत्रं तत्त्वलक्षं जपेत्प्रिये
दशांशं जुहुयाद्देवि संस्कृते हव्यवाहने दशांशं तर्पये
दुग्धैः सलिलैः शालितण्डुलैः गन्धपुष्पाक्षताकल्पध
नवस्त्रादिभिः प्रिये भक्ष्यभोज्यान्नपानाद्यैर्हव्यद्रव्यैर्मनो
हरैः तोषयेद्योगिनीचक्रं यथाविभवविस्तरैः एवं
मासं जपध्यानसहोमार्चनतर्पणैः मंत्रसिद्धमवाप्नो दे
वि साक्षात्परशिवो भवेत् ततः समनसोऽभीष्टान्प्र
योगान्कुलनायके मंत्रेणानेन मतिमान्साधयेद्व
क्रियुक्तये सिद्धमंत्रस्य सिध्यंति षट्कर्माणि न संशयः
नैव सिध्यंत्यसिद्धस्य देवताशापमाप्नुयात् काम्यप्रयो
गकर्तॄणां परलोको न विद्यते

प्रयोगसिद्धिरेवैषां फलमसन्नकारयेत् एकस्यापिवि
धानस्य न कृत्वापि फलंलभ्यम् देवेशिदृश्यते तस्मान्नि
ष्कामोदेवतांयजेत् होमतर्पणमंत्राद्यैर्नानाध्यानवि
शेषकैः आत्मनश्चपरस्यापिषट्कर्माणिसमाचरेत
प्रयोगांतेचकृपूजांप्रयोगांतेसमाचरेत लक्षमेकंज
पेन्मंत्रंमासध्यानसमन्वितः प्रयोगदोषशांत्यर्थंआ
त्मरक्षार्थमेवच नचेत्फलमवाप्नोतिदेवताशाप
माप्नुयात् दिनमावर्तिकरणयोगम् हेतुपंचमम् दी
पेशाकुलचक्राणिज्ञात्वाकर्माणिसाधयेत् ऋषिछ
न्दोदेवतांगमासध्यानार्चनादिकम् वीजंशक्तिंकील
कंचज्ञात्वामंत्राणिसाधयेत् मंत्रविद्याभेदनिर्णयो
स्त्रियोमादिपंचकम् ह्रींपुंनपुंसकादींश्चज्ञात्वाक
र्माणिसाधयेत् पंचशुद्ध्यासनप्राणायामाद्यासादि
मालिका दोषसंस्कारशुद्ध्यादिज्ञात्वाकर्माणिसाधयेत
तथैवासनदिग्वस्त्रनाडीवस्त्रादिसंगतिम् देवताका
लमुद्रादिज्ञात्वास्वगणवरानने साध्यसाधककर्मा
णिलेखनीद्रव्यपंचकम् स्थानंतत्त्वप्रमाणंचज्ञात्वा
कर्माणिसाधयेत् उत्पत्तिवसनावर्णमूर्तिसंस्कार
संस्थितम् कुंडंतद्द्रव्यसंख्यादीन्ज्ञात्वाहोमंसमाच
रेत् अग्निप्रभायूमवर्णान्व्यनिगन्धशिखाकृतिः ज्ञात्वा

कु चेष्टादिकं ज्ञात्वा कल्पयेत्तच्छुभाशुभम् मन्त्रतत्त्वानुस
व न्धानदेहावेशादिलक्षणम् मन्त्रोच्चारणभेदं च ज्ञात्वा क
७८ र्म्माणि साधयेत् मण्डलं सकलं द्रव्यशुद्धिगन्धाष्टका
दिकम् दीक्षाकामप्रदानादि ज्ञात्वा दीक्षां समाचरेत्
नित्यं नैमित्तिकं काम्यं नियमं नामवासनाम् पूजाधार
णंघत्रादिज्ञात्वा कर्म्माणि साधयेत् पूजागृहप्रवेशादि
कुलपूजादिलक्षणम् कुलद्रव्यादिसिद्धिं च ज्ञात्वा पू
जां समाचरेत् अन्तर्यागं बहिर्यागं मण्डलादिस्थापनादिक
म् पञ्चपुष्पाञ्जलिं देवि ज्ञात्वा कर्म्माणि साधयेत् प
रायणादिकशान्तं द्रव्यकामकलात्मकम् बटुकादिब
लिं देवि ज्ञात्वा कर्म्माणि साधयेत् कुलाकुलाख्यणाम
नं शक्तिभेदं च लक्षणम् शुभलक्षणसंयुक्तस्त्रीसंस
काराह्वानादिकम् देवि सम्भोगकालं च ज्ञात्वा शक्तिं प
रिग्रहेत् पानभेदफलोल्लासप्रमाणस्थितिलक्षणम् त
त्त्वत्रयस्वीकारं ज्ञात्वा कुलमृतं पिबेत् चक्रप्रवेशं
प्रणतिं स्थितिं निर्गमनं प्रिये योगिनीयोगचेष्टादि
ज्ञात्वा भवति कौलिकः रसोल्लासनकालं च कुलदीप
निवेदनम् शान्तिस्तवादिपठनं ज्ञात्वा स्यात् कुलदेशि
कः मिथुनानुग्रहार्घाष्टपुष्पिणीकन्यकार्चनाम् वि
शेषतिथिपूजां च ज्ञात्वा कर्म्माणि साधयेत् आम्नाय

भेदं संकोचं प्रसमंकोचमेव च गुरुत्रयं संप्रदायं ज्ञात्वा
कर्म्माणि साधयेत् श्रोतविद्याकुलाचारमन्त्रभेदं च पा
दुकाम् चरणचितयं देविज्ञात्वाकर्म्माणि साधयेत् सा
धिकस्य समयस्य नकौलिकाराधनक्रमम् सिद्धिमुद्राध
र्णाद्यादि ज्ञात्वा कर्म्माणि साधयेत् गुर्व्वग्निप्रेतसंस्कारं
श्रेसेष्टिं दिग्बलिक्रमम् मोक्षदीपविधानादि ज्ञात्वा
कर्म्माणि साधयेत् इत्याद्याः कथिताः किंचिद्विशेषाः
कुलनायिके सर्व्वेषामपि मंत्राणां विधिः सावरणक्र
मः मंत्राः पुरुषदेवाः स्युर्व्विद्या ह्यो देवता प्रिये मंत्राः पु
सोह्रुफडंताः प्राणे चरति दक्षिणे प्रवृत्ते ऽग्निजाया
न्तो विद्याः स्त्रीदेवता प्रिये वामे प्राणप्रवृत्ते नमोऽन्ताः
स्युर्नपुंसकाः नाडीद्वयगते सर्व्वे मंत्रा बोधप्रयांति च
शांतिके मनवः सौम्या भूयिष्ठं न्नुमतास्तराः स्वाहांताः
स्युर्व्विद्वेषणाद्याः क्रूरकर्म्माणि साधयेत् सिद्धिपुष्टौ वषौ
हुः विंफट्वैववत्रमारणे स्तंभने च नमः प्रोक्तः स्वाहा
शांतिकपौष्टिके होमतर्पणयोः स्वाहा सा सम्पूजनयो
र्नमः मंत्रांते योजयेन्मंत्री जपकाले यथास्थितिः शांति
के राजतं ताम्रं भूर्जपत्रं तु वश्यके सर्व्वकार्य्येषु सौवर्णं
क्रूरे स्यात् प्रेतकर्प्परम् त्रिगन्धं शांतिके प्रोक्तं पञ्चगन्धं
वश्यके सर्व्वकार्य्येष्वष्टगन्धं क्रूरे वा ष्टविषाणि च शां

कु निकेलेखनीहर्म्मुविषपादोपिविप्रच्छिका स्वहृदेशं॥
व तिकर्म्मस्याहृशणांचचण्डिकालये सर्व्वकार्य्यदेवरहेश
७७ मशानेक्रूरकर्म्मच लक्षणमेवमादीनिसात्वागुरुमुखा
त्प्रिये सर्व्वकर्म्माणिकुर्व्वीतमंत्रीतत्तत्फलाप्तये मूले
प्रासादबीजंचतरुणादित्यसन्निभम् उत्तमांगेपराबी
जंचन्द्रायुतसमप्रभम् परस्परजनस्पर्शजनितानन्द
निर्भरः मूलादिब्रह्मरन्ध्रान्तंभ्रनवच्छिन्नवृष्टिभिः प
रमामृतस्यसिक्तैः सिक्तमापादमस्तकम् आत्मानंभा
वयेन्नित्यंसभवेदजरामरः एवंध्यात्वाकुलेशानिस
र्व्वकर्म्माणिसाधयेत् सिध्यंतितस्माद्देविनात्रकार्य्या
विचारणा मासभेदःप्रवक्ष्यामिसर्व्वसिद्धिकरंप्रिये ई
प्सितंलभतेयेनपूजाहोमादिकंविना स्थानेमनोहरे
देविसाधकःस्थिरमानसः स्थितोमृद्वासनेध्यायेद्
गुरुवन्दनपूर्व्वकम् मस्तकस्थितंसपूर्णचन्द्रमण्ड
लमण्डलम् श्रीप्रासादपराबीजंद्योतयन्सारसंयुतम्
शुद्धस्फटिककर्पूरकुन्देन्दुधवलंप्रिये सचन्द्रबिंब
संजातसुधाप्लावितविग्रहम् आत्मानंभावयेन्नित्यंस
निर्म्मलेनांतरात्मना सर्व्वाभीष्टंविलीयेतश्रीमत्प्रा
सिकारणाम् श्रीप्रासादपरामंत्रमष्टोत्तरसहस्रकम्
तरुणोल्लाससहितोमण्डलंपूजयेत्प्रिये ॥

अपमृत्युमहारोगज्वरामारणंजंभयम् ग्रहापस्मारवे
तालभूतोन्मादादिजंभयम् जित्वाधिव्याधिरहितः पु
त्रपौत्रसमन्वितः जीवेद्वर्षशतं साग्रं पूजितः सर्वमा
नवैः अक्रांतमृत्युतेशाण्डिक वितानिर्मलाभवेत्
चिन्मयेरोचतेसाहात्म्यात्कार्य्यविचारणा ज्वरोन्
मादादिरोगेषुजपेच्छिरसिचिंतयन् शूलवातव्रण
ग्रंथिमूत्रकृच्छ्रादिसंभवे तत्तत्स्थानेषुसंस्पृष्ट्वा पू
र्ववच्चिंतयन्जपेत् महारोगेषुजातेषुसर्वांगेषुवि
चिंतयेत् तत्क्षणाच्छांतिमायांतिरोगाःसर्वेनसंश
यः देहेन्द्रियेषुयोध्यायेल्लभेदिन्द्रियसौष्ठवम् यत्रवी
जंस्मरेत्तत्रतत्फलंलभतेध्रुवम् सदायश्चिन्तयेन्
मूर्ध्निसभवेदजरामरः सर्वरोगप्रहरणंविद्यारोग्य
प्रदंप्रिये अस्मात्परतरंकालेनास्तिसत्यंनसंशयः
सात्विकध्यानजन्देविफलमेतदुदीरितम् शांतिक
र्माणिसर्वाणिविधिनानेनकारयेत् विधिनानेन
देविप्रिसौभाग्यमतुलंलभेवेत् द्वादशाधारपद्मेषुद्वाद
शस्वरसंयुतम् वीजंसंचिंतयेद्यस्तुसभवेदजराम
रः षडाधारेषुवादीर्घषट्कंवीजंविचिंतयेत् षडाधा
रस्थदेवीभिःसमेतकुलनायिके रक्तपद्मकर्णिकाम
ध्येसूर्य्यमण्डलसंस्थितम् परांप्रासादवीजंतत्तरुणा

कु रुणसन्निभम् नवार्कबन्धूकसंकाशंपद्मरागप्रभोज्ज्वा
व लम् पंचविंशतिभिःस्पर्शास्तैर्द्वार्वावृतमम्बिके तत्
७८ प्रभापटलच्छायाभ्यक्तीकृतजगत्त्रयम् आत्मानंच
78 स्मरेद्देविनिश्चलेनांतरात्मना परप्रसादाद्वीजेन्द्रा
रुणोल्लाससंयुतः अष्टोत्तरसहस्रंतुमण्डलंप्रजपेत्
सुधीः देवदानवगन्धर्वसिद्धकिन्नरगुह्यकान् विद्या
धरान्मुनीन्यक्षान्नागानप्सरसःस्त्रियः सिंहव्या
घ्रोरगेन्द्रादीन्पशून्पक्षिमृगानपि वशान्करोतिस
देहः किंपुनर्मानवादयः महदैश्वर्यमाप्नोतिस्वर्ग
भोगादिकंप्रिये यस्यमूर्ध्निस्मरन्जप्यानसवशेजा
यतेध्रुवम् राजसध्यानजंदेविफलमेतदुदीरितम्
यस्यकर्माणिसर्वाणिविधिनानेनकारयेत् सर्वैव
श्यकरंदेविसर्वैश्वर्यफलप्रदम् अस्मात्परतरंध्या
नंनास्तिसत्यंनसंशयः लिखेत्त्रिकोणंषट्कोणमष्ट
रंचमहीपुरम् मूलमंत्रंलिखेन्मध्येसाध्यनामसम
न्वितम् षट्कोणेषुषडंगानिविलिखेत्परमेश्वरि
केशरेषुस्वरानष्टौवर्गान्पत्रेषुपार्वति भूपुरस्यचतुः
कोणेविलिखेन्मूलमंविके पंचवर्णरजोभिश्चशुभ
दृष्टमनोहरम् एवंयंत्रंसमालिख्यविधिवन्मन्त्रवित्त
मम् एकद्वित्रिषट्संख्यःकलशान्स्थापयेत्प्रिये

मथ्यादिवत्तरं शांतं द्वात्रिंशान्कलशान्प्रिये अथवा
ष्टादशेशानि सप्तवा दशवा प्रिये चतुरो वाप्यथैकं
वाकुर्य्यात्साधकसत्तमः अस्थिरक्तशिरांतत्वग्
मं`` रुधिरंजलम् चर्म्मवस्त्रासनंकूर्म्मनारिकेल
फलंशिरः मन्त्रपानसमायुक्तां यजेत्कलशदेवतां
माविद्धीनापंचाशानि मातरोभैरवान्विताः विदितायु
रुविघ्नेनतुगात्रेत्रपतीन्प्रिये कलशेषुसमभ्यर्च्य
विधिवन्मन्त्रसत्तमम् अभिषिंचेत्प्रियंशिष्यंसर्व
पापप्रणाशनम् आयुःश्रीकांतिसौभाग्यविद्यारो
ग्यधनंभवेत् राजाभिषिक्तोलभतेचतुःसागरगाम
हीम् अकिंचनोऽभिषिक्तश्चमहदैश्वर्यमाप्नुयात्
बहुनात्रकिमुक्तेन त्रिषुलोकेषुमंत्रिणाम् अनेना
मंत्रराजेननासाध्यंविद्यतेक्वचित् कुलाम्नायेकनि
ष्ठातःपराप्रासादमन्त्रवित् कुलार्णवार्थतत्त्वज्ञोजी
वन्मुक्तःकुलेश्वरि स्वतीर्थनामतीर्थंवाजलमध्ये
पिवावसन् पराप्रासादमंत्रज्ञोमुक्तपवनसंश्रयः
दिक्पीठक्षेत्रमुद्रादिहृत्तवलीमठादिकाः एविभै
रवदेव्यश्चकुलाम्नायस्यपावेति निष्कारस्करोन्मत्त
कंटकीविप्रदाणिभिः अस्थिकंटकहृतायेसदान
शुभकारणं वट्टकैःकुसुमवर्णैश्चसमित्पत्रफलानिवैः

कु शूद्रधूम्रचितांगारत्रिकटुम्लविनांजनैः उन्मत्तरससं
व सिक्तैः पिष्टुसम्यकप्रसेवितैः साध्यपाद ... जोभिश्च
७९ चिताभस्मसमन्वितैः साध्यप्रतिकृतिं कुर्य्यादेकनक्ष
त्रेष्टत्तजाम सम्यकप्रतिष्ठितप्राणान् कुण्डस्योपरि
चिन्तयेत् त्वेनेनतत्प्रतिमां मंत्री कुण्डस्याधो यथावि
धि मलीमसेन मनसा चाग्रदृष्टिरमर्षणः चितानले
रिपुतरुसमकाष्ठसमेधिते त्तदुत्थैर्जुहुयाद्देवि विधि
वन्मंत्रवित्तमः कुर्य्याद्धि शोषमुच्चाटेमारणादिनसं
शयः शांतिके सात्विकं देवि प्रोक्तवर्णं विचिंतयेत् यो
मध्या कुरुते मोहात्स भवेद्देवतापशुः तस्माद्देवि महा
घोरां मासषट्कावधिं सुधीः कृत्वाकर्म्माणि कुर्वीत
नान्यथा वीरवन्दिते मूलाधारसरोजान्तेवह्निमध्य
गंत प्रिये परप्रासादबीजेन तत्कलांताग्निसमप्रभम्
प्रतिलोमस्थं सबीनदशभिर्व्यापकादैः स्वयंकाला
नलसमः सर्व्वभूतभयंकरः दक्षिणाशामुखो भूत्वा
स्थिरदृष्टिमलीमसः यौवनोल्लाससहितः पराप्रा
सादसन्त्रकम् मंत्रमण्डलके जप्याद्दशोत्तरसहस्र
कम् अनिष्टकारिणः सन्वा विधनाशयकारिणः दु
ष्टान्क्लेशकरान् क्रूरान्स्वपर्य्याविघ्नकारिणः भूतोग्रग्र
वेतालान्पिशाचान्मदराक्षसान् इमाद्रिडष्टजन्तूंश्च सदा
क्लेशकरानपरान्

तदृष्टिमध्यपतितान्निर्दिश्यांश्च विचिन्तयेत् क्षणेन
नाशमायान्ति शलभा इव पावके यस्य मूर्द्धिन स्मरेद्दी
क्षं स्मरस्तमधिगच्छति ध्यानेनानेन देवेशि कोला
दीनपि नाशयेत् इति ते कथितं किंचित् काम्यक
र्मावधिप्रिये समासेन कुलेशानि किं भूयः श्रोतुमि
च्छसि इति श्रीकुलार्णवे महारहस्ये काम्यकर्मवि
धानं नाम षोडशोल्लासः १६ श्रीदेव्युवाच कुलेश श्रो
तुमिच्छामि गुरुनामादिवासनाम् तत्वं कुलपदा
र्थानां वद मे परमेश्वर श्रीईश्वर उवाच शृणु देवि प्र
वक्ष्यामि तन्मां त्वं परिपृच्छसि तस्य श्रवणमात्रेण कु
लज्ञानं प्रवर्त्तते गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्त
न्निरोधकः अन्धकारनिरोधत्वाद्गुरुरित्यभिधी
यते गुह्यागमात्मतत्वात्यन्तज्ञानोपायनादपि रुद्रा
दिदेवतारूपाद्गुरुरित्यभिधीयते स्वयमेवाचरेच्छि
ष्यानाचारे स्थापयत्यपि आचिनोति हि शास्त्रार्थाना
चार्यस्तेन कथ्यते आचारवशमापन्नमस्थापयया
ति यः स्वयम् यमादियोगसिद्धत्वादाचार्य इति कथ्य
ते आत्मभावप्रसादात्तु रागद्वेषादिवर्ज्जितात् ध्यानै
कनिष्ठचित्तत्वादाराध्य इति कथ्यते देवतारूपया
रित्वाच्छिष्यानुग्रहकारणात् करुणामूर्त्तित्वाद्देशि

कु
व
८
80

कथितःप्रिये स्वान्तशांतत्वसमुन्मीलत्परतत्त्वार्थचिन्तना
त् मिथ्याज्ञानविहीनत्वात्स्वामीतिकथितःप्रिये मनो
दोषादिहरत्वाद्धितत्वादादिवर्जितात् श्रादिप्राणोत्ससहः
शात्स्वपत्वाच्चमहेश्वरि श्रीमोत्तज्ञानदातृत्वादात्म
ब्रह्मनिरोधनात् स्थगिताज्ञानचितत्वात्श्रीनाथः।
कथितःप्रिये देशकालविरोधेनवर्त्तमानात्कुलाग
मे वशीकृतजगज्जीवादेवश्चाभिधीयते भवपाशप्र
शमनात्टस्कारेनेन्दुशेवरात् रक्षणात्कमनीय
त्वात्भट्टारकइतीरितः प्रत्यागमवेदान्तरहस्यात्म
निषेवणात् भक्तिमुक्तिप्रदानाच्च प्रभुरित्यभिधीयते
योनिमुद्रानुसन्धानात्प्रस्फुरन्मंत्रभैरवात् गीर्वाणग
णपूजनाद्योगीतिकथितःप्रिये संगडःखपरित्यागी
यत्रकुत्राश्रमाश्रयात् मिथ्यात्मानुसन्धानात्संयमी
मभिधीयते नत्वरूपस्यमननात्परिवादादिवर्जित्वात्
स्वीकमात्शुभकार्य्याणांतपस्वीत्यभिधीयते श्रुतरत्वा
हरेणनाहुतसंस्कारवन्धनात् तत्वयस्यात्मवोधत्वादव
धूतोःभिधीयते वीतरागमदक्लेशकोपमात्सर्यमोह
नः रजस्तमोविहीनत्वाद्धीरइत्यभिधीयते कुलंगोत्रंसमा
ख्यातंतत्वशक्तिशिवोद्भवं येनमोत्तइतिज्ञानंकौलिकः
सोःभिधीयते अकुलंशिवतामुक्तंकुलंशक्तिःप्रकीर्त्तितं

कुलाकुलानुसन्धानान्निपुणाः कौलिकाः प्रिये सार
संग्रहणाच्चैव धर्म्मकर्म्मप्रवर्त्तनात् करणग्रामनिय
मात्साधकः सोऽभिधीयते भजनात्पद्मयामस्याम
नोवाक्कायकर्म्मभिः तरत्सविलङ्गोगणितस्माद्भ
क्तइतीरितः शरीरमर्थंप्राणांश्चसद्गुरुभ्योनिवेदयः
गुरुभ्यः शिक्षतेयोगंशिष्यइत्यभिधीयते योनिमुद्रा
नुसन्धानात्गिरिजापादसेवनात् विलीनोपाधिवि
भवाद्योगिनीत्यभिधीयते शतकोटिमहादिव्ययो।
गिनीप्रतिकारणात् तीव्रस्फूर्त्तिप्रदानाच्चशक्तिरित्य
भिधीयते स्तोकस्तोकेन मनसः परमप्रीतिकारणात्
स्तोत्रसंतारणाद्देवि स्तोत्रमित्यभिधीयते यावदिन्द्रि
यसंतापमनसासैनियम्यच स्वांतेनाभीष्टदेवस्यचि
तनंध्यानमुच्यते चरितार्थविकाराच्चरक्षणादपिपा
र्वति नरनारीस्वरूपाच्चचरणंकथितंप्रिये विदिता।
खिलशास्त्रार्थसर्वधर्म्मनिरूपणात् दर्शनानां प्रमा
णत्वाद्धेदइत्यभिधीयते पुण्यापुण्यादिकथनाद्द्रा
सादिनिवारणात् नवतत्वादिकथनात्पुराणमितिक
थ्यते शासनादनिशंदेवि वर्णाश्रमनिवासिनाम्
तारणात्सर्व्वपापेभ्यः शास्त्रमित्यभिधीयते स्मरणा
द्धेनिमित्तानां धर्म्माधर्म्मनिरूपणात् तिमिरात्पाट

कु नादेविमूर्त्तिरित्यभिधीयते पापक्षपणादिकथनात्ति
व मिरांजनंभंजनात्‌ हरणात्सर्वदुःखानां कृपानिधिरि
८१ तिस्मृतः आचारकथनाद्दिव्यगतिप्राप्तिविधानतः म
हात्मतत्त्वकथनादागमःकथितःप्रिये शाकिनीगण
ध्वंसनात्तरणाद्भववारिधेः परादिशक्तिसान्निध्याच्छा
क्तइत्यभिधीयते कौमारादिनिरोधत्वान्नयजन्मादिभा
जनात्‌ अशेषकुलसंबन्धात्कौलइत्यभिधीयते पाश
च्छेदकरादेविरंजनात्परतेजसः पतिभिस्त्रिसमान
त्वात्पारंपर्यमितीरितम्‌ संसारसारभूतत्वात्प्रका
शानन्ददानतः यशःसौभाग्यकरणात्सम्प्रदायइती
रितः आदित्वात्सर्वमार्गाणांमनोल्लासप्रवर्त्तनात्‌
यज्ञादिधर्महेतुत्वादाम्नायइतिकीर्त्तितः संसृतानेक
मोहध्वंसतंत्रादिदेवनात्‌ आनरोग्यनवह्नित्वात्स्तो
त्रइत्यभिधीयते आम्नायतत्त्वरूपज्ञात्वात्तत्त्वात्मनिरू
पणात्‌ रागद्वेषादिशमनादाचार्यइतिकीर्त्यते दिव्य
भावप्रदानाच्चस्खलनात्कल्मषस्य च दीक्षेतिकथि
तासद्भिर्भवबन्धविमोचनात्‌ अलंकारत्वाभातिक
थनात्सेवनादपि कंपानन्दादिजननादभिषेकइ
तिस्मृतः मननात्तत्त्वरूपस्य देवस्यामिततेजसः त्रा
यते सर्वभयतस्तस्मान्मंत्रइतीरितः ॥

देहमास्थाय भक्तानां वरदानाच्च पार्वति तापत्रयादिश
मनाद्देविता परिकीर्तिता मायोपार्जितवित्तानां भोग
भुविनिवेशनात् सर्व्वरत्नाकराद्देवि मास इत्यभिधी
यते मुदं कुर्व्वन्ति देवानां मनांसि तारयन्ति च तस्मान्म
न्त्र इति ख्यातो दर्शितस्ते कुलेश्वरि अनन्तफलदाना
च्च तापिताशेषकल्मषः मातृकात्मतया लाभकर
णाद्रत्नमालिका यमभूतादिसर्व्वेभ्यो भयेभ्योऽपि
कुलेश्वरि त्रायते सततं चैव तस्मान्मन्त्र इतीरितः
आत्मसिद्धिप्रदानाच्च सर्व्वरोगनिवारणात् नवसि
द्धिप्रदानाच्च आसनं कथितं प्रिये मायाजालादि
शमनान्मोक्षमार्गनिरूपणात् अष्टदुःखादिविर
हान्न्यास इत्यभिधीयते मंगलस्य जननाद्देवि सच्चिदान
न्ददानतः सर्व्वदेवप्रियत्वाच्च मांस इत्यभिधीयते
पूर्वजन्माघशमनाद्यमस्य निवारणात् सम्पूर्ण
फलदानाच्च पूजेति कथिता प्रिये अभीष्टफलदत्वा
च्च चतुर्व्वर्गफलाश्रयात् वन्दनात्सर्व्वदेवानां अर्च्च
नं समुदाहृतम् तत्त्वात्मकस्य देवस्य परिवारस्य त
स्य च नवानन्दप्रजननात्तर्पणं समुदाहृतम् गा
भीर्यापायदौर्भाग्यक्लेशनाशनकारणात् धर्मज्ञा
नप्रदानाच्च गन्ध इत्यभिधीयते आत्मज्ञानप्रदानच्च

कु क्षपिताशेषकल्मषात् तदात्मकारणाद्देविग्रहन्तताः प
व रिकीर्त्तिताः पुण्यसंवर्द्धनाच्चापिपापौघपरिहारतः
८२ पुष्कलार्थप्रदानाच्चपुष्पमित्यभिधीयते पूताशेषमा
हादोषभूतिगन्धप्रभावतः परमानन्दजननात् धू
पइत्यभिधीयते दीर्घज्ञानमहाध्वान्ताहङ्कारपरिव
र्ज्जनात् परतत्वप्रकाशाच्चदीपइत्यभिधीयते मोहध्वा
न्तप्रशमनात् त्वधार्त्तिविनिवारणात् दिव्यरूपप्रदा
नाच्चपरतत्वप्रकाशनात् व्योतेमोहोदीपइतिमा
त्तमार्गैकसाधनः चतुर्विधकुलेशानिद्रव्यञ्चब
हुसंवितम् निवेदनाद्भवेत्तस्मिन्नैवेद्यमसुदाहृतं
बहुप्रकारविचरद्भूतौघविनिवारणात् लिप्त
पापप्रशमनाद्बलिरित्यभिधीयते तत्वत्रयविशु
द्धिः स्यात्तत्समागमात्ततः प्रिये तत्वप्रकाशहेतुत्वा
त्तत्वत्रयमितीरितम् चतुर्वर्गफलावाप्तेर्नूचिन्ता
ज्ञानबन्धनात् कल्याणधर्म्ममूलत्वाच्चरुकं कथितं प्रि
ये प्रकाशमन्दजननात् सामरस्यप्रदानतः दर्शनात्
परतत्वस्य श्रानन्दइतिकथ्यते पाशसंछेदनाद्देवि
नवतत्वस्यधारणात् पावनात् परमेशानिस्नानमि
त्यभिधीयते कर्म्मणामनसावाचासर्व्वावस्थासु स
र्व्वदा समीपसेवाविधिनाउपास्तिरितिकथ्यते पं

वांगोपासेनेनेष्टदेवताप्रीतिदानतः पुरश्चरतिभक्त्या
स्यतत्पुरश्चरणंप्रिये आवाहनादिकर्म्माणिषोडशा
ह्यादशावधिम् विधिनाचरणंप्रोक्तमुपहारमितिस्म
तम् संपूज्यसाहितेदेवंषोडशोरुपचारकैः स्वस्थान
प्रेषणंप्रोक्तंमष्टासनमितिप्रिये आसनेसन्निवे
शः स्यात्स्थापनंकुलनायिके प्रमोऽयमसमुत्तोका
रःसन्निधापनमीरितम् देवतांगेषडंगानांन्यासः
स्यात्सकलीकृतिः आच्छादनंसमुद्दिष्टमवगुण्ठ
नमीरितम् दर्शयेन्मुद्राश्चअमृतीकरणंप्रि
ये लमसेसंमुग्गलिदेविपरमीकरणंभवेत् स्वागतं
कुशलंप्रश्नंनिगदेद्देवताग्रतः पाद्यंश्यामाकदूर्वाब्ज
विष्णुक्रान्ताभिरुच्यते जातीलवंगककोलैरुक्त
माचमनीयकम् सिद्धार्थमक्षतंचैवकुशाग्रंतिल
मेवच यवंगन्धंफलंपुष्पमष्टांगार्घ्यःप्रकीर्तितः
मधाज्यदधिभिःप्रोक्तोमधुपर्कःकुलेश्वरि देवस्नान
लेनस्नानंस्नानीयसलिलैःसह कर्पूरचन्दनकस्तूरी
कालागुरुभिरुच्यते अष्टांगप्रणिपातेनकथितंव
न्दनंप्रिये अनन्यराचरंसर्वंदेवत्रमित्यभिधीयते त
तद्देवत्रपालितंयेनदेवत्रपालंसउच्यते इतितेकथि
तंकिंचिद्गुरुनामादिवासना समासेनमहेशानि

योजानातिसकौलिकः रहस्यातिरहस्यानांरहस्योऽ
यंमहेश्वरि कुलाम्नायःसमाख्यातःसमासेननविस्त
रात कुलार्णवमिदंशास्त्रंयोगिनानांहृदिस्थितम्
प्रकाशितंमयाचाद्यगोपनीयंप्रयत्नतः पुस्तकंव
महेशानिपशुगेहेननिःक्षिपेत् नदद्यात्पशुहस्ते
चेनपठेत्पशुसन्निधौ नपठेद्दासवोलासंग्रंथंभ्र
मेननिःक्षिपेत् नित्यंसंपूजयेद्भक्त्याजानीयाद्गु
रुवक्रतः नापुत्रायप्रवक्तव्यंनाशिष्याकदाचन
स्नेहालोभाद्भयाद्वाकामातो॰चिरान्नश्यतिध्रुवम्
देवियद्विद्यतेशास्त्रेतत्तत्किंचिन्नयोदितम् साध
कानांहितार्थायभक्तिमुक्तिफलैषिणाम् यश्चो
र्ध्वाम्नायमाहात्म्यंपठेत्श्रीचक्रसन्निधौ भक्त्या
परमयादेवियःशृणोतिसकौलिकः व्रतस्नाने
तपस्तीर्थयज्ञदेवार्चनादिषु यत्फलंकोटिगुणि
तंलभतेनात्रसंशयः तत्सन्निधौसन्निवसेत
नात्रकार्याविचारणा ॥

इतिश्रीकुलार्णवेमहारहस्येसप्तदशोलासः
१० समाप्तोऽयंग्रन्थः शुभमस्तु ॥

श्रीनगरे लिखितमस्ति सं॰ १९५४ वैक्रमीये

नं.१६५

नं. ५४८

